| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| अपेयक्षीरपानम्। तत्क्षीरविकारपानञ्च। अपेयक्षीरं यथा। अनिर्द्दशानां गोमहिषीच्छागीनां क्षीरम्। औष्ट्रं ऐकशफं आविकञ्च। सन्धिनीक्षीरम्। सन्धिनी वृषाक्रान्ता। विवत्साक्षीरम्। अरण्यमृगीक्षीरम्। स्त्रीक्षीरम्। स्रवद्दुग्धाक्षीरम्। यमसूक्षीरम्। विवत्साया अन्यवत्सायाश्च क्षीरम्। मथितक्षीरम्। छागवर्ज्जं द्विस्तनीक्षीरम्। अमेध्यभुजः क्षीरम्। व्रणादिदूषितस्तनीक्षीरञ्च। | ज्ञानतोऽभ्यासे पक्षं यावकपानम्।<br>अज्ञानतोऽर्द्धम्।<br>क्षत्रियादौ पादपादहानिः।<br>अत्र उष्ट्रीक्षीरमानुषीक्षीरपाने पुनरुपनयनञ्च।<br>इति अभक्ष्यभक्षणप्रायश्चित्तम् ॥*॥ | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| अथ स्तेयम्। मणिमुक्ताप्रवालाश्ममयलौहकांस्योपलानां हरणम्। | द्वादशाहं कणभक्षणम्। तत् षड़ुपवासात्मकम्।<br>अपहृतद्रव्यं स्वामिने दत्त्वैतत् करणीयम्। अत्र च सकृदभ्यासकालदेशद्रव्यस्वाम्यपहर्त्तृगुणदैन्याद्यपेक्षया उत्कृष्टापकृष्टद्रव्ययोर्वैषम्यदोषः समर्थनीयः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| रजताश्वगोभूमिकन्यानां सकृत् हरणम्। एतत् ब्राह्मणासम्बन्धिविषयम्। अत्र कन्यापदं अधमकन्यापरम्। | चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| उक्तेतरक्षुद्रपशुहरणम्। | प्राजापत्यम्।<br>अभ्यासे चान्द्रायणम्। | १ धेनुः।<br>८ धेनवः। | ३ कार्षापणाः।<br>२२॥०कार्षापणाः। | यथाशक्ति।<br>यथाशक्ति। |
| धान्यान्नधनानां हरणम्।<br>अन्नं कृतान्नम्। धनं गवादि। | अब्दकृच्छ्रम्।<br>एतत् ब्राह्मणकर्त्तृकब्राह्मस्वामिकदशकुम्भाधिकधान्यस्तेये ज्ञेयम्। कुम्भपरिमाणं यथा। दशद्रोणं भवेत् खारी कुम्भोऽपि द्रोणविंशतिः। | १५ धेनवः। | ४५ कार्षापणाः। | यथाशक्ति। |
| | द्विकालभोजनोचितभक्ष्यभोज्यान्नहरणे त्रिरात्रं पञ्चगव्यपानमात्रम्। भक्ष्यं मोदकादि। भोज्यशक्तादि। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | एककालभोजनोचितान्नहरणे एकरात्रं पञ्चगव्यमात्रपानम्। -<br>धनमपि एतत्परिमाणधान्यमूल्यमवसेयम्। | ० | ॥० पणाः। | यथाशक्ति। |
| मनुष्यादिस्तेयम्।<br>तत्तु दासदासीक्षेत्रगृहकूपवापीजलानां हरणम्। | चान्द्रायणम्।<br>क्षेत्रादीनान्तु उपयोगातिशयाद्यभ्यासाद्यपेक्षयास्त्येव प्रायश्चित्तं गुरुलाघवमिति। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| गुड़ादिस्तेयम्। आदिना कार्पाससर्पिर्लवणधान्यपक्वान्नौषधतैलशय्यावस्त्रोपानत्कांस्यलौहताम्रसीसकादयः। | कृच्छ्रपादः। एतत् सकृद्धरणविषयम्।<br>अभ्यासेद्वैगुण्यम्।<br>अत्र किञ्चिदधिकद्रोणत्रयस्य धान्यस्य तावद्धान्यमूल्यानाञ्चान्येषाञ्च हरणे एतद्वेदितव्यम्। | ० | ॥० पणाः। | यथाशक्ति। |